(शोधलेख नाम - संस्कृत वाङ्मय मानविज्ञान तत्वान) (325)

ISSN 2229-6328

ओ३म्

प्रेरणास्रोत : प० पू० स्व० स्वामी समर्पणानन्द जी महाराज

# पावमानी

त्रैमासिकी मूल्याङ्किता वैदिक-शोधपत्रिका
भाग: त्रयस्त्रिंश, चतुर्थ खण्ड (वि०सं० २०७६)

## एतरेय ब्राह्मण में विविध विद्याएँ

प्रधान सम्पादक

स्वामी विवेकानन्द सरस्वती

सम्पादक

ो० सोमदेव शतांशु | डॉ० वाचस्पति मिश्र

मूल्याङ्कन

ो० राजेश्वरप्रसाद मिश्र | प्रो० ब्रह्मदेव विद्यालंकार
ु०वि०वि०, कुरुक्षेत्र | गु.कॉ.वि.वि., हरिद्वार

प्रकाशक

स्वामी समर्पणानन्द वैदिक शोध संस्थान

गुरुकुल प्रभात आश्रम, टीकरी, भोला, मेरठ- २५०५०१

अक्तूबर २०१८ – दिसम्बर २०१८ | मूल्य १००.००

(327)

# संस्कृतवाङ्मये प्राणिविज्ञान-तत्त्वानि

डॉ० बृहस्पतिमिश्रः[1]

संसारं नाम चराचराणां पदार्थानां संग्रहः[2]। चरा अर्थात् चेतनशीलाः प्राणिनः[3]। अस्माकं भारतीयमनीषायाम् एषा प्रसिद्धिः यत् चतुरशीति-कोटिप्रकारकाः प्राणिनः संसारे भवन्ति। तेषां चतुर्विधाः विभागाः सन्ति उद्भिजः स्वेदजः अण्डजः चेतनशीलानां चतुर्षु विभागेषु - उद्भिजः इत्यत्र वृक्षाः लतापादपादयः, स्वेदजः इत्यत्र यूकाः मत्कुणादयः, अण्डजः इत्यत्र पक्षिणः सृरीसृपजलचरादयः, जरायुजः इत्यत्र मानवाः, स्तनपायिनः गृहीताः भवन्ति।

एतत् वैदिकऋषीणामनुचराणां भारतीयानां वैशिष्ट्यं यत् ते वृक्षेष्वपि चेतनत्वं स्वीकुर्वन्ति एतत् च आधुनिकशिक्षाप्रवीणः भारतीयसिद्धान्तेषु श्रद्धावान् श्रीजगदीशचन्द्रबसुमहोदयः केवलेन एकेन 'शस्यम्' (हिंसायोग्यम्) इति शब्देन स्वानुसन्धानैः बहुविधं प्रदर्शनं कृत्वा समग्रस्य विश्वस्य अग्रे सिद्धं कृतवान् यत् वृक्षाः पादपाः वा सचेतनाः भवन्ति, अस्मद्दृशाः एव भावनया भाविताः भवन्ति। मनुस्मृतिः "अर्धचेतनाः भवन्त्येते, सुखदुःखसमन्विताः।" इति प्रमाणयति[5]।

एतत् प्राणिविज्ञानम् वेदानुसारि भवति चेत् आध्यात्मिकमाधिभौतिकं

---

[1] प्राध्यापकः, श्रीशक्तिसंस्कृतमहाविद्यालयः, श्रीनयनादेवी, बिलासपुरम्, हि०प्र०

[2] यः प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव ॥ (यजु. - २३.३)

[3] क. यथा कर्म तपोयोगात्सृष्टं स्थावरजङ्गमम्। (मनु. १.४१)

ख. भूतानां प्राणिनः श्रेष्ठाः (मनु. १.६६)

[4] मनु. १.४३, ४४, ४५, ४६। तुलनीयं "चतुर्विधो भूतग्रामो स्वेदजाण्डजोद्भिजजरायुजश्च" (हस्त्यायुर्वेदः शल्यस्थाने द्वादशोऽध्यायः)

[5] मनु. १.४६ , तुलनीयं - चरकसंहितायाम् "सेन्द्रियं चेतनद्रव्यं निरेन्द्रियमचेतनम्, अत्र सेन्द्रियत्वेन वृक्षादीनामपि चेतनत्वं बोद्धव्यम्" इति।

उद्देश्यद्वयमपि साधयति। यतोहि आधुनिकाः केवलं प्राणिनां भेदोपभेदैः आकारप्रकारैः भोजनावाससन्ततिविवेचनैः एव सन्तुष्टाः। किन्तु वैदिकाः न केवलं सन्तुष्टाः अपितु ते तु कथं प्राणिनः प्राणवन्तः? किमेतत्? कथमागच्छति? कुतः आगच्छति? कथम्? किमर्थम् शरीरम् धारयति इत्यादिविषयेषु अपि जिज्ञासामुत्पाद्य समाधान प्रस्तुवन्ति[१]।

वेदा सर्वासां सत्यविद्यानाम् आधाराः सन्ति[२]। सर्वेषां विज्ञानानां मूलम् एते एव[३]। सर्वेषां मूलबीजानि वेदमन्त्रेषु उपलभ्यन्ते। पुनश्च मूलबीजानि व्याख्याग्रन्थेषु प्ररूढानि[४]। तदन्तरं कैश्चित् अशेषशेमुषीविद्वद्भिः पृथक्-पृथक् ग्रन्थाः रचिताः। पुनः तस्यामेव विज्ञानस्य परम्परायां पृथक्-पृथक् शाखामधिकृत्य सूक्ष्मरूपेण विद्वद्भिः शास्त्राणि रचितानि। वेदेषु मूलरूपेण वर्णनं प्राप्यते। क्वचिदुपमा माध्यमेन क्वचिदुपाङ्गरूपेण, क्वचिच्च उपदेशमाध्यमेन उपलब्धाः भवन्ति[५]। प्राणिविज्ञानस्य अपि विकीर्णाः गूढाः अंशाः रहस्यरूपेण मन्त्रेषु उपलभ्यन्ते। निदर्शनमेतत् किञ्चित् –

**क.** "वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तितिरीञ्छरदे वर्तिका हेमन्ताय ककराञ्छिशिराय विकरान्"[६]।

अर्थात् सुनिश्चितेषु एव ऋतुषु विशिष्टाः पक्षिणः प्रामुख्येन सन्ततिं वर्धयन्ति।

**ख.** "भूम्या आखूनालभते अन्तरिक्षाय प्राङ्क्तान् दिवे क्रशान् दिग्भ्यो नकुलान् बभ्रुकानवान्तरदिशाभ्यः।"[७]

इत्यादि बहुविधप्रकारैः पशुपक्षिणाम् स्वभावव्यवहारादीनां वर्णनं प्राप्यते[८]। एवमेव

---

[१] केनोपनिषद् १-१, छांदोग्योपनिषद् ६.१२

[२] स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः - मनु. २७

[३] आर्यसमाजस्य तृतीयः नियमः।

[४] निरुक्तम् प्रथमोध्याये षष्ठः पादः

[५] अर्थवेदः १२.१.२७, २.६.१, ८.८.१४, ऋग्वेद १०.१४६.२, ३, १०.२६.१

[६] यजु. २४.२०

[७] यजुर्वेदः २४.२६

[८] अथर्ववेदः २.३१.३, ३.१४.४, यजुर्वेदः २५.३२, ऋग्वेदः ७.१०३.४, ७.१०३.६